"सत्त्वेन वीर्य्येण पराक्रमेण
धैर्य्येण शौर्य्येण च तेजसा च ॥")
आरभटी । इति मेदिनी ॥
शौल्कं, त्रि, शुल्कसम्बन्धि । शुल्कशब्दात् अणप्रत्ययेन निष्पन्नम् ॥
शौल्किकः, पुं, (शुल्के अधिकृतः । शुल्क + ठञ ।) शुल्काध्यक्षः । इति हेमचन्द्रः ॥ (यथा, याज्ञवल्क्ये । २ । १७६ ।
"शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम्।
अर्व्वाक् संवत्सरात् स्वामी हरेत परतो नृपः ॥")
शौल्किकेयः, पुं, विषभेदः । इत्यमरः ॥ शुल्किको देशभेदस्तत्र भवः शौल्किकेयः । ढ यः । तालव्यादिः । इति भरतः ॥
शौल्फं, क्ली, शाकविशेषः । शल्फा इति भाषा । भूतचतुर्द्दश्यां चतुर्द्दशशाकमध्ये तद्भक्षणीयम् । यथा, निर्णयामृते ।
"ओलं केमुकवास्तूकं सर्षपं कालश्च निम्बं जयां
शालीञ्चीं हिलमोचिकाञ्च पटुकं शौल्फं गुडुचीन्तथा ।
भण्टाकीं सुनिसण्णकं शिवदिने खादन्ति ये मानवाः
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते तिथौ ॥"
इति तिथ्यादितत्त्वम् ॥
अस्य पर्य्यायगुणाः शतपुष्पाशब्दे द्रष्टव्याः ॥
शौल्विकः, पुं, कंसकारः । काँसारि इति भाषा । तत्पर्य्यायः । ताम्रकुट्टकः २ । इत्यमरः ॥ कामन्दकी ३ कांस्यकारः ४ । इति जटाधरः ॥ ताम्रिकः ५ ताम्रकारकः ६ । इति शब्दरत्नावली ॥
शौवं, क्ली, (श्वन् + "शुनः सम्प्रसारणं वा च दीर्घत्वम्" ६ । ४ । १४४ । इत्यस्य वार्त्तिकोक्त्या अपि साधु । ) शुनः सङ्कोचः । शुनो द्वन्द्वम् । श्वोभवम् इति संक्षिप्तसारव्याकरणम् ॥
शौवनं, क्ली, (श्वन् + अण् ।) शुनो भावः । शुनोऽपत्यम् । इति संक्षिप्तसारव्याकरणम् ॥ (शुनः समूहः । श्वन् + "खण्डिकादिभ्यश्च ।" ४।२।४५। इत्यञ् । कुकुरसमूहः । इति व्याकरणम् ॥ शुनो मांसम् । इति काशिका । ६।४। १३३ ॥)
शौवस्तिकं, त्रि, (श्वो भवम् । श्वस् + "श्वसस्तुट् च ।" ४ । ३ । १५ । इति ठञ् तुडागमश्च । ) भाविदिनस्थायिवस्तु । यथा,—
"आत्मम्भरिस्त्वं पिशितैर्नराणां
फलेग्रहीन् हंसि वनस्पतीनाम् ।
शौवस्तिकत्वं विभवा न येषां
व्रजन्ति तेषां दयसे न कस्मात् ॥"
इति भट्टौ २ सर्गः ॥
"येषां विभवाः सम्पदः शौवस्तिकत्वं भाविदिनस्थितत्वं न व्रजन्ति तेषां कस्माच्च दयसे । श्वोभवः शौवस्तिकः श्वसो भवार्थे कण्विधानात् कणि मनीषादित्वात् त्यागमः हारस्वरेतिठम्

त्विधे विरिति वि: त्वतौ भावे इति त्वम् ।" इति तट्टीका ॥
शौवापदं, त्रि, ( श्वापदस्येदमिति । श्वापद + अण् । "पादान्तस्यान्यतरस्याम् ।" ७।३।९। इति पक्षे ऐच् । ) श्वापदसम्बन्धि । श्वापदशब्दात् अणप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, अनर्घराघवे । १ । २५ ।
"कश्चित् कान्तारभाजां भवति परिभवः
कोऽपि शौवापदो वा
प्रत्यूहेन क्रतूनां न खलु मखभुजो भुञ्जते
वा हवींषि ॥")
शौष्कलः, पुं, ( शुष्कलं पण्यमस्येति । अण् । ) शुष्कमांसस्य पणकः । इति मेदिनी ॥
शौष्कलः, त्रि, (शुष्कलीमत्तीति । शुष्कली + अण् ।) आमिषाशी । इत्यमरः ॥ मत्स्यमांसभोजनशीलः । आमिषं अश्नाति आमिषाशी ग्रहादित्वाण्णिन् । शुष्कली शुष्कमांसे स्यान्मांसमात्रे ऽपि दृश्यते । तामत्ति शौष्कलः अः । तालव्यादिमूर्द्धन्यमध्यः । शुष्कं मांसं लाति इति शुष्कलः प्रज्ञादित्वात् अणि शौष्कलः । इति विद्याविनोदः । शाष्कलः इति पाठः । इति स्वामी । इति भरतः ॥
श्चुत } क्षरे क्षरणे । इति कविकल्पद्रुमः ॥
श्च्युत } (भ्वा०-पर०-अक०-सेट् ।) द्वौ तालव्यवर्गाद्ययुक्ततालव्यादी । शेषोऽन्तःस्थादियुक्तश्च । नकारजावनुस्वारपञ्चमावित्यादिनियमेऽप्यनयोस्तालव्यादित्वं तद्वचनस्य व्यभिचारसूचनार्थं तेन चुलुम्प लोपे इत्यादीनामोष्ठ्यवर्गशेषोपधत्वं सङ्गच्छते । तेन क्विपि संयोगान्तलोपे चुलुम् इत्यादि सिद्धम् । किन्तु द्वौ दन्त्यादौ इति धातुप्रदीपक्रमदीश्वरौ । तेन श्चुतं श्चोतति इति श्चुतवत् तमाचष्टे इति णौ णौमिष्ठवत् इति डित्वाट्टिलोपे श्चुतयति पुनः क्विपि णेर्लोपे श्चुतस्क इति स्थिते संयोगादेः सस्य लोपे श्चुतक् इति केचित् ॥ क्षर, अचुश्चुतत् अश्चोतीत् । अचु श्च्युतत् अश्च्योतीत् । क्षर इति आसेचनं क्षरणञ्च । रक्तमाश्च्योतति श्चुर इति । इदं कवचमश्चोतीदिति । निश्चोतन्ते सुतनुकवरी बिन्दवो यावदेते । इति मालत्यां गणकृतानित्यत्वम् । इति दुर्गादासः ॥
श्चोतः, पुं, ( श्चोततमिति । श्चुत + घञ् । ) प्रावारः । इत्यमरः ॥
श्म, [न्] क्ली, मुखम् । इति श्मश्रुशब्दटीकायां भरतः ॥ (शरीरम् । इति निरुक्तिः । ३ । ५ ॥ शवः । इति पुराणम् । अस्य प्रमाणं श्मशानशब्दे द्रष्टव्यम् ॥ )
श्मशानं, क्ली, (श्मनां शवानां शानं शयनं यत्र । यद्वा, शवानां शयनमिति । "पृषोदरादीनि यथोपदिष्टानि ।" ६ । ३ । १०९ । इति शवशब्दस्य श्मादेशः शयनशब्दस्यापि शानशब्द आदेशः । ) शवदाहस्थानम् । तत्पर्य्यायः । पितृवनम् २ । इत्यमरः ॥ शतानकम् ३ रुद्रा-

क्रीड़: ४ दाहसरः ५ इति त्रिकाण्डशेषः ॥ अन्तशय्या ६ पितृकाननम् ७ । इति जटाधरः ॥*॥ तस्य व्युत्पत्तिर्यथा,—
"श्मशब्देन शवः प्रोक्तः शानं शयनमुच्यते ।
निर्व्वचन्ति श्मशानार्थं मुने शब्दार्थकोविदाः ॥
महान्त्यपि च भूतानि प्रलये समुपस्थिते ।
शेरतेऽत्र शवा भूत्वा श्मशानन्तु ततो भवेत् ॥"
महाश्मशानं यथा,—
"वाराणसीति विख्याता रुद्रावास इति द्विजाः ।
महाश्मशानमित्येवं प्रोक्तमानन्दकाननम् ॥"
इति श्रीस्कान्दे काशीखण्डे ३० अध्यायः ॥*॥
"उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥"
इति चाणक्यम् । ६७ ॥*॥
श्मशाने गत्वा विष्णुस्पर्शे दोषो यथा,—
वराह उवाच ।
"श्मशानं यो नरो गत्वा अस्नात्वैव तु मां-स्पृशेत् ।
मम दोषापराधस्य शृणु तत्त्वेन यत् फलम् ।
जम्बुको जायते भूमे वर्षाणां नव पञ्च च ।
गृध्रस्तु सप्तवर्षाणि जायते खचरेश्वरः ॥
चरन्तौ मानुषं मांसं उभौ तौ गृध्रजम्बुकौ ।
पिशाचो जायते तत्र वर्षाणि नव पञ्च च ॥
ततस्तु कुणपोच्छिष्टं त्रिंशद्वर्षाणि खादति ।
ततो नारायणाच्छ्रुत्वा धरणी वाक्यमब्रवीत् ॥
एतन्मे परमं गुह्यं लोकनाथ जनार्द्दन ।
परं कौतूहलं देव निखिलं वक्तुमर्हसि ॥
श्मशानं पुण्डरीकाक्ष ईश्वरेण प्रशंसितम् ।
तत्र किं विगुणं देव पावित्रे शिवभाषिते ॥
स तत्र रमते नित्यं भगवांस्तु महाद्युतिः ।
कपालं गृह्य देवोऽत्र दीप्तिमन्तं महौजसम् ॥
प्रशंसितश्च रुद्रेण भवता किं विनिन्दितम् ।
श्मशानं पद्मपत्राक्ष रुद्रस्य च निशि प्रियम् ॥
वराह उवाच ।
शृणु तत्त्वेन मे देवि इदमाख्यानमुत्तमम् ।
यथापि ते न जानन्ति अनघे शंसितव्रताः ॥
कृत्वा सुदुष्करं कर्म्म सर्व्वभूतपतिर्हरः ।
हत्वा च बालहृदानि त्रिपुरे रूपिणीः स्त्रियः ॥
तेन पापेन सम्बद्धो न शक्नोति विचेष्टितुम् ।
ततः ईशो मया चोक्तो वाक्यमेव सुखावहम् ॥
किमिदं तिष्ठसे रुद्र कश्मलेन समाहतः ।
तव चैव प्रियार्थाय येनाहमिदमागतः ॥
ततो मम वचः श्रुत्वा लब्धसंज्ञो महेश्वरः ।
उवाच मधुरं वाक्यं पापसन्तप्तलोचनः ॥
तव विष्णो प्रसादेन मया तत्त्रिपुरं हतम् ।
निहता दानवास्तत्र गर्भिण्यश्च निपातिताः ॥
बालहत्या हतास्तत्र विस्फुरन्तो दिशो दश ।
तस्य पापस्य दोषेण न शक्नोमि विचेष्टितुम् ॥
प्रनष्टयोगमायश्च नष्टैश्वर्य्यश्च माधव ।
किं मया विप्रकर्त्तव्यमेनोऽवस्थेन माधव ॥
विष्णो तत्त्वेन मे ब्रूहि शोधनं पापनाशनम् ।
येन वै कृतमात्रेण शीघ्रं मुच्येत किल्विषात् ॥